No. ४६२०

Title उभय व्रत पूजापद्धतिः

Author ×

Extent ३ पत्राणि Age सं. १७५३

Subject धर्मशास्त्रम्

उभयाव्रतपूजाविधिः

४६२०

4620

F. 3

उममाश्वरपूजाविधि

६०

श्रीगणेशाय नमः ॥ अथ अनयव्रते कर्तव्यतानिरूप्यते ॥ एकभक्तं सदा कार्यं अपक्वेनापवा
सकः । द्वादश्यां पारणं कार्यं संपूज्यो हि जनार्दनः ॥१॥ दशम्यामेकभक्तं च स्त्रियान्न गतकुजैः
सह । ब्रह्मचर्यपरेणैव स्थातव्यं नियमेन तु ॥२॥ दशम्यामपराह्णे तु कार्यं वै दंतशोधनं ।
अपामार्गस्य काष्ठेषु तांबूलस्य च भक्षणं ॥३॥ अपराह्णे यथा कार्यो भोजनस्य निषेध
कः । अपराह्णे तथा देयं स्नानादि दिने त्रिकोविधः ॥४॥ रात्रौ जागरणं कार्यं स्तुतिपाठपरे
ण तु । प्रहरे प्रहरे पूजायां मनकार्या निरंतरं ॥५॥ प्रभाते पारणं कार्यं समाप्य नियमक्र
मं । ब्रह्मचर्यं तथा कार्यं द्वादश्यामपरोऽपि तु ॥६॥ दशम्यां पूर्वकं दंतधावनपूर्वकं नियमं ।
तत्र मंत्रः ॥ विष्णुपूजनं ॥ अद्येत्यादि० अद्यप्रभृति संवत्सरं यावत् ॥ अनया० कर्तव्य० ॥ अ
नया व्रतस्य सांगतासिद्ध्यर्थं श्रीलक्ष्मीनारायणप्रीत्यर्थं षोडशोपचारैः पूजना
द्यर्चनमहं करिष्ये ॥ पूजनं ॥ ब्राह्मणभोजनसंकल्पः ॥ पूजासमाप्य पूजं गृहीत्वा ॥ एकाद
श्यां निराहारस्थित्वा चैवापरेऽहनि ॥ भोक्ष्येऽहं पुंडरीकाक्ष शरणं मे भवाच्युत ॥ दशम्यामप
राह्णे अपामार्गदंतधावनं । तांबूलभक्षणं । एकादश्यामपराह्णे स्नानादिनित्यं कुर्यात् । १
अद्येत्यादि० कलशस्थापनं । षोडशोपचारपूजनं । इदं विष्णुरिति मंत्रेण देहन्यासः ।
यथा देहे तथा देवे । इदं विष्णु० ॥ [illegible] कृत्वा तु सर्वदिक्छेदे ॥ इहास्य

तांशुनेदेव ब्रह्मरूपी नमोस्तुते। श्रीलक्ष्मीनारायणप्रीत्यर्थं॥ आवाहनं। इदं विष्णु०॥ नमस्ते
देवदेवेश गोविंद पुरुषोत्तम। नमस्ते केशवानंत। आसनं प्रतिगृह्यतां। आसनं। इदं विष्णु०।
विष्णुमंडलमध्यस्थ पुरुषे विश्वरूपिणे। समर्पितं मया देव गृहाणेदं तपाद्यमुत्तमः। पाद्यं॥
इदं विष्णु०। इदमर्घ मया देव गृहाण तपाद्यमुत्तमः। श्रेष्ठं पापहरं स्त्रिवं। गृहाण देवदेवे
श सजलैरन्निजियानिमितं। अर्घ्यं। इदं विष्णु० इदमाचमनं देवं जतं प्रत्येतव प्रभो॥
अद्याहं पूजयिष्यामि वरदो वरदा स्मृतः। आचमनं। पंचामृतस्नपनं। इदं विष्णु०। स्नाना
दिकं विधापातैः सदा सौचकाय पुनः तो यस्नानं मयादत्तं गृह्यतां चमलापहं॥ स्नानं॥
गंगा सरस्वती रेवा यमुना जलसंपुतैः। समर्पितं मयादेवं मंत्रपूर्वेन्नवेजलं। स्नाना
ते आचमनं। इदं विष्णु०। नारायण नमस्तेस्तु नरकार्णवतारकं। त्रैलोक्य व्यापकानां च
त्राहि मां मधुसूदन। वस्त्रं समर्पयामी। वस्त्रांते आच०। इदं विष्णु०। दामोदर नमस्तेस्तु
त्राहि मां मधुसूदनः। ब्रह्मसूत्रं परं यन्यं गृहाण परमेश्वरः। उपवीतं॥ इदं विष्णु०॥ श्री
खंडं चंदनं दिव्य नानागंधमनोहरं। विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यतां। चंदनं॥
इदं विष्णु०। पुष्पाणि च सुगंधानि माल्यवंत्यानि वे प्रभो। मयाहृतानि पूजार्थं देवेश
प्रतिगृह्यतां। पुष्पं॥ ॐ विश्वेश्वराय पादाभ्यां जानुनी विश्वरूपिणे। अंघेमहाबलापेति

कटिं यज्ञेश्वराय च ॥१॥ कामाय कामपतये मेढ्रं तस्य प्रपूजयेत् । उदरं तस्य देवस्य
मायारूपाय ते नमः ॥ बाहु चक्रधरायेति मुखं साममयाय च । ललाटं सूर्यरू
रूपाय त्रिस्कंधं ...मपाय च ॥३॥ श्री नृसिंहायेति यथा सर्वांगाणि यस्य पूजयेत् ।
ॐ नमो मत्स्यदेवाय कूर्मदेवाय ते नमः ॥४॥ नमो वराहदेवाय नारसिंहाय ते न
मः । वामनाय नमस्तुभ्यं परशुरामाय ते नमः ॥५॥ रामाय दाशरथये ऽप्रमेयाय
नमो नमः । नमोस्तु रामदेवाय कृष्णदेवाय ते नमः ॥६॥ नमोस्तु बुद्धदेवाय क
ल्किने च नमोस्तु ते ॥ नमः सर्वात्मने तुभ्यं श्रीरइत्यानि पूजयेत् ॥७॥ केश
वाय नमः । संकर्षणाय नमः । नारायणाय ० । वासुदेवाय ० । माधवाय ० ।
2 प्रद्युम्नाय ० । गोविंदाय ० । ऽनिरुद्धाय ० । विष्णवे ० । पुरुषोत्तमाय ० । मधुसू
दनाय ० । ऽधोक्षजाय ० । त्रिविक्रमाय ० । नृसिंहाय ० । वामनाय ० । ऽच्युता
य ० । श्रीधराय ० । जनार्दनाय ० । हृषीकेशाय ० । उपेंद्राय ० । पद्मनाभाय ० । हरये ० ।
दामोदराय ० । श्रीकृष्णाय नमः । इति पूजनं । अथ मंडलपूजनं । पूर्वपत्रे त्रैलोक्य २
प्रकाशाय नमः । आग्नेयां ... नमः । दक्षिणस्यां विश्वात्मने नमः । नैऋ

त्यां सूक्ष्मात्मने नमः। पश्चिमस्यां सर्वतोमुखाय नमः। वायव्यां सुवर्णरेतसा
य नमः। उत्तरस्यां मार्तण्डाय नमः। ईशान्यां सूक्ष्मात्मने नमः। वैनतेयो महातेज
सुखसंपत्तिदायक। सप्ताश्वरथमारूढ अरुण मे प्रसीद तु। अरुणाय नमः। त
त्पुरुषाय विद्महे सहस्राक्षाय धीमहि। तन्नः सूर्यः प्रचोदयात्। श्रीसूर्याय
नमः। इदं विष्णु०। वनस्पइद्भवं दिवं नानागंधसुसंयुतं। आघ्रायसर्वदेवा
नां धूपोयं प्रतिगृह्यतां। धूपं। इदं विष्णु०। आज्यवर्तिसमायुक्तं वर्तिसंयोजि
तं मया। गृहाणदेव दीपायं त्रैलोक्यव्यापिने नमः। दीपं०। पत्रं पुष्पं फ०। दू
र्वाक्षतफलैः पुष्पै र्दद्यादर्घ्यं पूर्णमंजलिं। ऋग्यजुःसामसंयुक्तं मंडलं यस्य दीयते।
पुत्रार्थं जीवनदातारं नवमे भगवान् भवेत्। धनधान्यादि सर्वं च गृहाणार्घ्यं
नमोस्तु ते। श्रीफलअर्घ्यं। इदं विष्णु०। नैवेद्यं फलपक्वान्नं तांबूलादिकमुत्तमं।
इप्सितं वरं मे देहि वरत्रय मुनीनां गतिं। नैवेद्यं। इदं विष्णु०। अनंतकामदेवाय स
र्वकामफलप्रदः। एतद्धर्मसमाजोक्त पुत्रपौत्रप्रवर्द्धनं। नमस्कारः। आरात्रिकं।

इदं विष्णु०। जपयज्ञं देवदेवेन। जयधर्मजयाय च। जयकामदत्तकृत्या। नां प्रान्तो विष्णुन
मोऽस्तु ते। एषा स्तुतिः पूर्णा निन्त्हकानि परिच्युतानि यानीह कर्माणि मया स्तुतानि।
दामानि तानि मया यद्देवं प्रयाति तुष्टः परमागमाय इति प्रदक्षिणा। पुण्याहं दी
र्घ०॥ ब्राह्मणान्नो जनं। दक्षिणासंकल्पः। दक्षिणाः पांच। अभिषेक। आशीर्वादः॥ ।
इत्युत्तमयाजंते पूजाविधिसमाप्तः॥ ॥ रात्रौ जागरणं दद्या। सर्वपापैः प्रमुच्यते
मनसा संस्मरेद्देवं शंखचक्रगदाधरं।१। सर्वतन्त्रविधानेन जपहोमबलि
क्रिया। ॐ ड वा स्कंध छेवापि तत्र होमं प्रकल्पयेत्॥२॥ इदं विष्णुर्द्विजाती नोक्ता
ममंत्रश्च कीर्तितः॥ शूद्राणां च सर्वेषां मंत्रमष्टाक्षरं विदुः॥३॥ विविधानि च व
स्त्राणि नाजना न्यासनानि च॥ पदानि च नवांगानि। प्रदेयानि पृथक् पृथक्॥
॥४॥ द्वादशैव प्रदातव्याः ॐ नाः पकान्नपूरिताः। मोदकैर्मण्डकैर्युक्ता अनंताय ३
प्रदापयेत्॥५॥ इति सम्यक्॥ ॥ संवत् १७५३ वर्षे पौषसुदि षष्ठि गुरुवारे
लिखितं। पंड्या वनु लु ज नी पुस्तिका॥ यदक्षर० तं। तत्सु० परमेश्वर।